( नन्दगोपः अस्या जातः। तारकादित्वात् इतच्। ) नन्दगोपजन्मभूम्यादिः ॥

नन्दथुः, पुं, ( नन्दनमिति। नन्द+“द्वितोऽथुच्।” ३। ३। ८९। इति अथुच्। ) आनन्दः। इति शब्दरत्नावली ॥

नन्दनं, क्ली, ( नन्दयतीति। नन्द+“नन्दिग्रहि-पचादिभ्यो ल्युणिन्यचः।” ३। १। १३४। इति ल्युः। ) इन्द्रवनम्। इत्यमरः। १। १। ४८॥ ( यथा, कुमारे। २। ४१।
“अभिज्ञाश्छेदपातानां क्रियन्ते नन्दनद्रुमाः।”
अष्टादशाक्षरवृत्तिविशेषः। अस्य विवरणन्तु छन्दःशब्दे द्रष्टव्यम्॥ आनन्दः। यथा, महाभारते। २। २५। ६।
“स्वस्तिवाच्यार्हतो विप्रान् प्रयाहि भरतर्षभ!।
दुर्हृदामप्रहर्षाय सुहृदां नन्दनाय च॥”)
हर्षके, त्रि। इति मेदिनी। ने, ८०॥ ( यथा, महाभारते। ३। १४६। ५।
“पश्य दिव्यं सुरुचिरं भीम पुष्पमनुत्तमम्।
गन्धसंस्थानसम्पन्नं मनसो मम नन्दनम्॥” )

नन्दनः, पुं, ( नन्दयतीति। नन्द+ल्युः। ) पर्व्वत-भेदः। यथा, कालिकापुराणे ७५ अध्याये।
“तीरे तु चन्द्रकुल्याया नन्दनो नाम वै गिरिः।
तस्मिन् वसति शक्रस्तु कामाख्यासेवने रतः॥
मर्त्यभावं समासाद्य सर्व्वदेवेश्वरो हरिः।
सेवितुं त्रिदशेशानीं सततं वर्त्तते नतः॥
चन्द्रकूटस्य तु गिरेर्नन्दनस्य तथा गिरेः।
प्रतिदर्शं तथा चन्द्रं प्रदक्षिणयति त्रिधा॥
चन्द्रकुल्याजले स्नात्वा समारुह्य च नन्दनम्।
आराध्य शक्रं लोकेशं महाफलमवाप्नुयात्॥”
( विषविशेषः। इति हेमचन्द्रः। ४। २६३॥ अश्वार्थे, पुं क्ली, इति वाचस्पतिः॥ यथा, सुश्रुते कल्पस्थाने २ अध्याये।
“चन्द्रपाचककर्कटकरीयकरीयककरघाटकरम्भ-नन्दनवराटकानि सप्त वत्सनाभनिर्य्यासविषाणि॥”
स्कन्दस्यानुचरविशेषः। यथा, महाभारते। ९। ४५। ३६।
“वर्द्धनं नन्दनञ्चैव सर्व्वविद्याविशारदौ।
स्कन्दाय ददतुः प्रीतावश्विनौ भरतर्षभ!॥”
सिद्धपुरुषविशेषः। यथा, भागवते। ४। ६। २२।
“स नन्दनाद्यैर्महासिद्धैः शान्तैः संशान्त-विग्रहम्।
उपास्यमानं सख्या च भर्त्रा गुह्यकरक्षसाम्॥”
जिनबलविशेषः। इति हेमचन्द्रः। ३। २६२॥ वत्सरविशेषः। यथा, बृहत्संहितायाम्। ८। ३८।
“नन्दनोऽथ विजयो जयस्तथा
मन्मथोऽथ परतश्च दुर्मुखः॥”
महादेवः। यथा, महाभारते। १३। १७। ७५।
“नन्दीश्वरश्च नन्दी च नन्दनो नन्दिवर्द्धनः॥”)
विष्णुः। यथा, “आनन्दो नन्दनो नन्दः।” इति महाभारते। १३। १४९। ६९॥

नन्दनः, पुं, क्ली, (नन्दयतीति। नन्द+ल्युः।) सुतः। इति मेदिनी। ने, ८०॥ (यथा, रघुः। ३। ४१।
“अतीन्द्रियेष्वप्युपपन्नदर्शनो
बभूव भावेषु दिलीपनन्दनः॥” )
भेकः। इति शब्दरत्नावली॥

नन्दनजं, क्ली, ( नन्दने जायते इति। जन+डः। ) हरिचन्दनम्। इति राजनिर्घण्टः॥ ( नन्दनात् आनन्दाज्जायते इति।) हर्षजाते, त्रि॥ (पौराण॥)

नन्दनन्दनः, पुं, ( नन्दस्य नन्दनः सुतः आनन्द-जनको वा। ) श्रीकृष्णः। इति शब्दरत्नावली॥ तस्य लीलासंवरणान्ते तन्महिषीणां दस्यु-हस्तगतत्वकारणं यथा,—
व्यास उवाच।
“कः श्रद्धध्यात् सगाङ्गेयान् हन्यात्त्वं सर्व्वकौर-वान्।
आभीरेभ्यश्च भवतः कः श्रद्दध्यात् पराभवम्॥
पार्थैतत् सर्व्वभूतस्य हरेर्लीलाविचेष्टितम्।
त्वया यत् कौरवा ध्वस्ता यदाभीरैर्भवान् जितः॥
गृहीता दस्युभिर्याश्च भवता शोचिताः स्त्रियः।
तदप्यहं यथावृत्तं कथयामि तवार्ज्जुन!॥
अष्टावक्रः पुरा विप्रो जलवासरतोऽभवत्।
बहून्वर्षगणान् पार्थ! गृणन् ब्रह्म सनातनम्॥
जितेष्वसुरसंघेषु मेरुपृष्ठे महोत्सवः।
बभूव तत्र गच्छन्त्यो ददृशुस्तं वरस्त्रियः॥
रम्भातिलोत्तमाद्यास्तु शतशोऽथ सहस्रशः।
तुष्टुवुस्तं महात्मानं प्रशशंसुश्च पाण्डव!॥
आकण्ठमग्नं सलिले जटाभारधरं मुनिम्।
विनयावनताश्चैनं प्रणेमुः स्तोत्रतत्पराः॥
यथा यथा प्रसन्नोऽसौ तुष्टुवुस्तं तथा तथा।
सर्व्वास्ताः कौरवश्रेष्ठ! वरिष्ठन्तं द्विजन्मनाम्॥
श्रीअष्टावक्र उवाच।
प्रसन्नोऽहं महाभागा भवतीनां यदीप्सितं।
मत्तस्तद्व्रियतां सर्व्वं प्रदास्याम्यतिदुर्लभम्॥
श्रीपराशर उवाच।
रम्भातिलोत्तमाद्यास्तं वैदिक्योऽप्सरसोऽब्रुवन्।
प्रसन्ने त्वय्यसंप्राप्तं किमस्माकमिति द्विज!॥
इतरास्त्वब्रुवन् विप्र! प्रसन्नो भगवान् यदि।
तदिच्छामः पतिं प्राप्तुं विप्रेन्द्र! पुरुषोत्तमम्॥
श्रीव्यास उवाच।
एवं भविष्यतीत्युक्त्वा प्रोत्ततार जलान्मुनिः।
तमुत्तीर्णञ्च ददृशुर्विरूपं वक्रमष्टधा॥
तन्दृष्ट्वा गूहमानानां यासां हासः स्फुटोऽभवत्।
ताः शशाप मुनिः कोपमवाप्य कुरुनन्दन!॥
श्रीअष्टावक्र उवाच।
यस्माद्विरूपरूपं मां मत्वा हासावमानना।
भवतीभिः कृता तस्मादेष शापं ददामि वः॥
मत्प्रसादेन भर्त्तारं लब्ध्वा तु पुरुषोत्तमम्।
मच्छापोपहताः सर्व्वा दस्युहस्तं गमिष्यथ॥”
“एवन्तस्य मुनेः शापादष्टावक्रस्य केशवम्।
भर्त्तारं प्राप्य ता याता दस्युहस्तं वराङ्गनाः॥
तत्त्वया नात्र कर्त्तव्यः शोकोऽल्पोऽपि हि पाण्डव!।
तेनैवाखिलनाथेन सर्व्वन्तदुपसंहृतम्॥”
इति विष्णुपुराणे। ५। ३८। ६८—८५॥

नन्दनन्दिनी, स्त्री, ( नन्दस्य नन्दिनी कन्या। ) “नन्दगोपगृहे जाता यशोदागर्भसम्भवा।” इति मार्कण्डेयपुराणोक्तदेवीवचनात् तथात्वम्। ) दुर्गा। इति शब्दरत्नावली॥

नन्दनमाला, स्त्री, ( नन्दना आनन्दजनिका माला। ) कृष्णप्रीतिप्रदमालिकाविशेषः। यथा,
“भूप नन्दनमालान्तु कुरुते कृष्णवेश्मनि।
देवकन्यावृतैर्यक्षैः सेव्यते सुरनायकैः॥”
इति द्वारकामाहात्म्ये हरिभक्तिविलासधृत-विष्णुधर्म्मोत्तरम्॥

नन्दना, स्त्री, ( नन्दयतीति। नन्दि+ल्युः। टाप्। ) दुहिता। इति जटाधरः॥

नन्दन्तः, पुं, ( नन्दत्यनेनेति। नन्द+“दृहिनन्दि-जीविप्राणिभ्यः षिदाशिषि।” उणां ३। १२७। इति झच् स च षित्। ) पुत्रः। राजा। मित्रम्। इति संक्षिप्तसारोणादिवृत्तिः॥

नन्दपालः, पुं, ( नन्दं आनन्दं निधिविशेषं वा पालयतीति। पालि+अच्। ) वरुणः। इति शब्दरत्नावली॥

नन्दपुत्त्री, स्त्री, ( नन्दस्य पुत्त्री। ) दुर्गा। इति त्रिकाण्डशेषः॥

नन्दयन्तः, त्रि, ( नन्दयतीति। नन्दि+“तॄभू-वहीति।” उणां ३। १२८। इति झच् स च षित्। ) आनन्दजनकः। इति सिद्धान्तकौमु-द्यामुणादिवृत्तिः॥

नन्दा, स्त्री, ( नन्दयतीति। नन्दि+अच्+टाप्। ) गौरी। अलिञ्जरः। नादा इति भाषा। तिथि-विशेषः। ताश्च उभयपक्षयोः प्रतिपत्षष्ठ्येका-दश्यः। इति मेदिनी। दे, ६॥ (यथा,—
“नन्दा भद्रा जया रिक्ता पूर्णा प्रतिपदः क्रमात्॥”
इति ज्योतिषम्॥ )
ननान्दा। इति शब्दरत्नावली॥ सम्पत्। इति हेमचन्द्रः॥ * ॥ दुर्गाया नन्दानामकारणं यथा,—
“एवमुक्त्वा भवं ब्रह्मा पुनर्देवीं स चाब्रवीत्।
त्वया देवि! महत् कार्य्यं कर्त्तव्यञ्चाप्यदस्ति नः॥
भविष्यं महिषाख्यस्य असुरस्य विनाशनम्।
एवमुक्त्वा ततो ब्रह्मा सर्व्वे देवाश्च पार्थिव!॥
यथागतास्ततो जग्मुर्देवीं स्थाप्य हिमे गिरौ।
संस्थाप्य नन्दिता यस्मात्तस्मान्नन्दा तु सा भवेत्॥”
इति वराहपुराणम्॥ * ॥
अपि च।
“नन्दते सुरलोकेषु नन्दने वसतेऽथवा।
हिमाचले महापुण्ये नन्दा देवी ततः स्मृता॥”
तस्या माहात्म्यादि यथा,—
“यथा गङ्गा नदीनान्तु उत्तमत्वे व्यवस्थिता।
तद्वद्भगवती नन्दा उत्तमत्वेन संस्थिता॥
मासे भाद्रपदे देवि! शुक्लपक्षे व्रजेत् सदा।
तस्येच्छा श्रावणाषाढे अन्यथा न कदाचन॥
तेषाञ्च चन्द्रनागस्तु पीडां कुर्य्यात् सुलोचने।
न गच्छन्ति सुराः सिद्धाः किं पुनर्म्मानुषादयः॥
विषवातहताः केचित् विषवातप्रपीडिताः।